International Journal of Sanskrit Research 2021; 7(5): 204-212

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(5): 204-212
© 2021 IJSR
www.anantaajournal.com
Received: 18-07-2021
Accepted: 20-08-2021

**संगीता राणी विश्वालः**
शोधच्छात्रा, सम्बलपुर-विश्वविद्यालये, सम्बलपुरम्, ओडिशा, भारत

**Corresponding Author:**
**संगीता राणी विश्वालः**
शोधच्छात्रा, सम्बलपुर-विश्वविद्यालये, सम्बलपुरम्, ओडिशा, भारत

# श्रीपुरुषोत्तमचरिते दार्शनिकपरिशीलनम् / संगीता राणी विश्वालः

## संगीता राणी विश्वालः

**DOI:** https://doi.org/10.22271/23947519.2021.v7.i5d.1503

**सारांशः**
देवभाषा संस्कृतभाषा सर्वासां भाषाणां जननीति समग्रविश्वे सुपरिचिता । अस्यां महनीया-भाषायां विविध-काव्य-कविता-नाटक-उपन्यासादयः रचयित्वा उत्कलस्य वरपुत्राः स्वप्रतिभायाः उत्कर्षतां प्रतिपादितवन्तः । तेषु सुयोग्य-संस्कृतविद्वान् गणेश्वर-रथमोहदयः स्वस्वसाधनाचवलेन संस्कृतवाङ्मयं समृद्धं कृतवान् तथा उत्कलभूमेरक्षयकीर्त्तिं समग्रविश्वे स्थापितवान् । न केवलं काव्यक्षेत्रे अपि तु वेद-वेदाङ्ग-व्याकरण-दर्शन-धर्मशास्त्रादिक्षेत्रेषु अपि अस्याः अम्लानधारा सौच्छलन्ती प्रवहति इति महतः आनन्दस्य विषयः । तस्य प्रकाशितेषु ग्रन्थेषु 'पुरुषोत्तमचरितम्' इति महाकाव्यं कवेः उच्चोकोटिकं कवित्वं प्रकाशयति । भारतीयधर्मस्य दर्शनस्य च प्राचीनतमं मूलस्वरूपं भवति ऋग्वेदः । अत्र सवितृ-मन्त्रः 'तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि, धियो यो नः प्रचोदयात्' इति प्रणवेन मिलित्त्वा स मन्त्रः गायत्रीमन्त्रः इति सर्वजनध्येयः । कविः स्वीये श्रीपुरुषोत्तम-महाकाव्यस्य प्रथम-सर्गस्य प्रथम-श्लोके एवं परंब्रह्मणः स्वरूपं वर्णयति । यथा -
"वरेण्यमन्तहृदयं पुनाति नं-
स्त्रयीमयं यत् त्रिगुणं गुणातिगम् ।
जगत्-प्रसूति-स्थिति-नाश-कारणं
चकास्ति तेजो विभु भूर्भुवः स्वरोम् ॥"
सर्वाणि दर्शनानि यथा ब्रह्मणः स्वरूपं, मायायाः स्वरूपं, धर्मानुवन्धित्वम्, कर्मवादः, सेवाधर्मः, विश्ववन्धुत्वभावः, एकात्मभावः, जीवनोपयोगिता, पुनर्जन्मविषयादि पुरुषोत्तमकाव्यस्य विभिन्नसर्गे कविः वाचस्पतिः अभिव्यनक्ति । काव्येऽस्मिन् तस्य शास्त्र-नैपुण्य-समेतं दार्शनिक-भावकत्वञ्च सहृदय-जनानां श्रद्धाभाजनं भवितुमर्हति । एतत् सुनिश्चितं यत् दर्शनं मानवजीवनं पावयति तथा समुन्नयति, सद्भावं प्रेरयति, जनेषु मैत्री-शान्ति-साम्यादि वार्ता प्रसारं कृत्वा समग्रविश्वे सार्वभौमिकिं सार्वलौकिकिं च उन्नतिं निर्दिशति ।

**कूटशब्दः -** दर्शनम्, परमात्मनः स्वरूपम्, मायाया स्वरूपं, आध्यात्मिकता, धर्मः, कर्मः, पुरुषार्थम्, एकात्मभावना, विश्ववन्धुत्वभावना ।

**उपक्रमः**

साहित्यं नाम समाजतत्त्वम्, सकलसुखसाम्राज्यसाधनम्, अलौकिक-आनन्दकारणम् । अत्रैव समाजस्य उत्कर्ष-अपकर्ष-रीति-नीति-विचार-व्यवहाराणां दर्शनं दृश्यते । अतः साहित्यं देश-जाति-समाजानां दर्पणः इति अभिधीयते ।

तेषु संस्कृत-साहित्यमतीव महत्त्वपूर्णम्, अतिव्यापकम्, प्राचीनतमं च भवति । अत्र सर्वमेव मानव-ज्ञानं आभासते । सर्वेषां शास्त्राणां समाहार-स्वरुपं संस्कृत-साहित्यं विश्वमानवानां रुचिं वर्धयति । साहित्येऽस्मिन् युगरुच्यनुसारं पुरातन-तत्त्वैः सार्धं नूतन-तत्त्वानां परस्परं समन्वयः परिलक्ष्यते । संस्कृतसाहित्यं प्रति उत्कलस्य अवदानमतीव महत्त्वपूर्णम् । संस्कृतसाहित्यस्य परिसरं वर्द्धयितुम्, उत्कलस्य नाम सार्थकयितुं च उत्कलस्य कवयः अहर्निशं स्वलेखनीं चालितवन्तः चालयन्ति चालयिष्यन्ति च । तेषु सारस्वतसाधकेषु कविवरेषु वाचष्पति-गणेश्वर-रथ-महोदयः अन्यतमः । तस्य प्रकाशितेषु ग्रन्थेषु 'श्रीपुरुषोत्तमचरितम्' महाकाव्यं सर्वजनादृतम् ।

'श्रीपुरुषोत्तम-चरितम्' इति महाकाव्ये पुरुषोत्तमशब्दः श्लेष-माध्यमेन अर्थ-युगलं प्रकाशयति, महाप्रभु-श्रीजगन्नाथं पुरुषोत्तम-नामक-राजानं च बोधयति । महाप्रभुः श्रीजगन्नाथः दारुब्रह्म-स्वरुपः पुरुषोत्तम-श्रीक्षेत्रे उत्कले नीलकन्दरे विराजते । तस्य महाप्रभोः प्रसादात् तद्-भक्तः पुरुषोत्तम-देव-नामकः उत्कलीय-राजा काञ्चीदेशं विजित्य तत्रस्थां राजकन्यां पद्मापतीं परिणीतवान् । अस्य कवेः श्रीपुरुषोत्तमचरिते महाकाव्ये प्रतिपादिताः दार्शनिकविचाराः अस्मिन् प्रस्तुतेलेखे किञ्चित् विचारयामः ।

## पुरुषोत्तमचरिते दार्शनिकपरिशीलनम्:

प्रथमं 'दर्शनम्' इति शब्दस्यार्थः किम् ? दर्शनं-शब्दोऽयं संस्कृतस्य प्रेक्षणार्थकाद् 'दृश्' धातोः 'करणाधिकरणयोश्च' इति सूत्रेण 'ल्युट्'प्रत्यये अनादेशे च कृते दर्शनम् इति पदं सिद्धम् । 'दृश्यते अनेन इति दर्शनम्' । परमात्मनः तत्त्वस्य अनुचिन्तन-सोपानम्, आत्मज्ञानसाधनम्, आध्यात्मिकतत्वस्य परिशीलनम्, मनोविश्लेषणस्य परीक्षणागारः भवति दर्शनम् । येन साधनेन इदं विश्वं, ब्रह्म, जीवात्मा, प्रकृतिश्च यथातथ्येन दृश्यते, निरीक्ष्यते, समीक्ष्यते, विविच्यते च तत् दर्शनम् । अनेन सांसारिकाणां पदार्थानां वास्तविकस्वरूपं ज्ञायते ।

जगतः वास्तवस्वरुपस्य दर्शनं कर्तुं दार्शनिकः सर्वदा प्रयतन्ते। सुदुरात् अतीत कालात् आरभ्य अधुनाकालं यावत् जगतः मूलं तात्त्विकस्वरूपं ज्ञातुमनवरतरुपेण प्रयत्नः वर्तते स्म, इदानीं च निरन्तरं क्रियमाणः वर्तते । किन्तु तस्य सम्बन्धे अद्यावधि मतैक्यं स्थापितं भवितुं न शक्नोति । जगतः स्वरुपस्य सम्वन्धे अद्य उपलब्धासु अनेकासु व्याख्यासु यानि अपि सन्ति, तानि भारतीय-अस्तिक दर्शनेषु वर्त्तन्ते । तानि भारतीय-दर्शनानि न केवलं भारतवर्षे अपितु अद्य भारतात् वहिरपि विदेशीयान् प्रभावितं कुर्वन्ति । अतःभारतवर्षः एकः समृद्धशीलः परिपूर्णदेशः । अतः उच्यते-

> "धर्मे चार्थे च कामे च मोक्षे च भरतवर्षभ ।
> यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ॥"[1]

वैदिकसाहित्यतः आरभ्य लौकिकसाहित्यपर्यन्तं जीवनदर्शनस्य विवेचनं दृश्यते । प्रत्यक्षतया अथवा परोक्षतया काव्येषु अवश्यमेव जीवनदर्शनस्य तत्त्वं परिदृश्यते । अनेन मानवसमाजस्य मार्गनिदर्शनं सुष्ठुतया भवति । यद्यपि वहुषु काव्येषु जीवनदर्शनस्य प्रभावः दृश्यते तथापि वाचस्पतेः काव्येषु जीवनदर्शनस्य विवेचनं मुख्यरूपेण दृश्यते । तेषु पुरुषोत्तमचरिते काव्ये परमात्मनः स्वरूपं, मायायाः स्वरूपं, धर्मवादः, कर्मवादः, सेवाधर्मः, विश्ववन्धुत्वभावः, एकात्मभावनादि जीवनदर्शनविषयाः वर्णिताः । अत्र कवेः पाण्डित्यं, दार्शनिकत्वं, कवित्वं च एकत्र विभान्ति ।

## ब्रह्मणः स्वरूपम् :-

भारतीयदार्शनिकाः ब्रह्मणः स्वरुपं विभिन्नरूपेण उपस्थापितवन्तः । ब्रह्मा तु प्रकाशानामपि प्रकाशः तेजसामपि तेजः अस्ति । तस्य एव तेजसा निखिलं जगद् द्योतते । तस्मात् परमात्मनः निखिलमपि विश्वं सम्भवति, तत्रैव लीयते । सच्चिदानन्दस्वरुपब्रह्म कारणातीतः, अनन्तः, स्वयं प्रकाशकः, अजरः, अमरः, निर्विकारः, निर्विकल्पः, सर्वशक्तिमान्, सर्वज्ञः, सर्वव्यापकः, त्रीगुणातीतः, विवेकी, विषयी, विशेषः, अपरिवर्त्तनशीलश्च । परंब्रह्मणः स्वरूपं श्रीमद्भगवद्गीतायाः पञ्चदशाध्याये पुरुषोत्तमयोगे भगवान् श्रीकृष्णः अर्जुनं प्रति कथयति -

> "यस्मात् क्षरमतितोऽहमक्षरादपि चोत्तमः ।
> अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥"[2]

कठोपनिषदि ब्रह्मणः स्वरूपम् -

> "अशब्दमस्पर्शमरूपमव्ययं
> तथाऽरसं नित्यमगन्धवत् च यत् ।
> अनाद्यनन्तं महतः परं ध्रुवं
> निचार्य तन्मुत्युमुखात् प्रमुच्यते ॥"[3]

केनोपनिषदि यथा -

"यन्मनसा न मनुते येनाहुर्मनो मतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥"[४]

मुण्डकोपनिषदि यथा -

"यत्तदद्रेश्यम् अग्राह्यम् अगोत्रम्
अवर्णम् अचक्षुः श्रोत्रं तत् अपाणि पादम्
नित्यं विभुं सर्वगतं सुसूक्ष्मं तत् अव्ययं
यत् भूतयोनिं परिपश्यन्ति धीराः ॥"[५]

न्यायदर्शनानुसारं सः ब्रह्मः सृष्टिस्थितिप्रलयकर्त्ता इति । तैत्तिरीयोपनिषदि भृगुवल्लां प्रथमानुवाके अपि उपसन्नाय पुत्राय भृगवे, देवः वरुणः इदमेव तथ्यं प्रकाशयति - "यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रत्यभिसंनिशन्ति, तद्विजिज्ञासस्व तद् ब्रह्मः इति ।" अर्थात् अनेनैव ब्रह्मणा सर्वाणि जातानि भूतानि जीवन्ति । सृष्टेः स्थितिकाले प्राणान् धारयन्ति । प्रलयकाले इदमेव प्रतिगच्छन्ति । तदनुसारेण श्रीपुरुषोत्तमकाव्ये पञ्चमसर्गे कविना अस्मिन् विषये प्रतिपादितम् -

"योतो न किञ्चित् परमन्यदास्ते
यद्रुपमेतत्त्रिजगद्विभातम् ।
यस्मिंल्लयं याति लये समस्तं
गजाननः किन्नु तोतोऽस्ति भिन्नः ॥"[६]

कविः काव्येऽस्मिन् निर्विकल्पा निर्विकारा च सत्ता 'ब्रह्म' इति स्वीकरोति । स ब्रह्म नित्यः अविनाशी आत्मवशः स्वाधीनः सर्वव्यापकश्च । सर्वं खल्विदं जगत् ब्रह्मणः विवर्त्तरुपम् । सः एव भगवान् अजोऽपि अजन्मापि उदारैः, स्वगुणैः ब्रह्मादिरूपेण अवर्णो सन् नट इव अनेकरूपेण विभाति । पुरुषोत्तमचरिते यथा -

"अजोऽपिनित्यः स्वगुणैरूदारैराविर्भन्नात्मवशः स एव
ब्रह्मादिकां भिन्नतनुं दधानो यथा नोटोऽनेकतया वि
भाति ॥"[७]

वेदान्तदर्शने 'जीवोब्रह्मैव नापरः' इति अद्वैतवादः उपन्यस्तोऽस्ति । अज्ञानवशात् जीवाः पृथग्रुपाः दृश्यन्ते । यथा एकमेव जलं विभिन्नेषु जलाशयेषु पात्रेषु च विविधनामरुपेण उपचर्यते, तथैव जीवाः विविधशरीरेषु विविधनामरुपेण निवसन्ति । प्रलयकाले यदा जगद् विनश्यति तदा ब्रह्म पूर्ववत् तिष्ठति । तद् ब्रह्म सर्वेषां हृदयाभ्यन्तरे विरजितः सन् प्राणिनाम् अन्तःकरणं पवित्रीकरोति । वरेण्यः, विश्ववन्द्यः, सत्त्वोरजोतमोमयः, सगुणात्मकः, निर्गुणमयश्च सः जगतः सृष्टि-स्थिति-संहाराणां कारणम् । तेन ब्रह्मणा जगदिदं कल्पितम् । सः स्वयं कृतिमान् कर्त्ता-कार्य-साधकतम-समस्तकारणमयः गुणातितः अस्ति । सचराचरविश्वस्य हेतुरूपेण दृश्यमानमिदं जगत्रयमभिन्नं त्वोद्रूपमेव । सः श्रीजगन्नाथः निर्विकल्प-निराकार-निर्गुणब्रह्म-परमार्थिकसत्तास्वरुपः । कविना काव्येऽस्मिन् सूच्यते-

"त्वमसि कृतिमान् कृतिः स्वयं
कारणं हेतुततिर्गुणातिगः ।
सचराचरविश्व कारणाद्
भवतोऽभिन्नमिदंजगत्रयम् ॥"[८]

अपि च-

"नित्यं जगत् कारणमद्वितीयं
ब्रह्मैव सर्वं जगदेतदास्ते ॥"[९]

तस्य परब्रह्मणः स्वरुपं, महिमानञ्च प्रकाशयन् कविः वाचस्पतिः काव्येऽस्मिन् एवमेव व्यनक्ति ।

**मायायाः स्वरुपम् :-**

"अनादिमायया सुप्तो यदा जीवः प्रबुध्यतेः ।
अजमनिद्रमस्वप्नमद्वैतं वुध्यते तदा ॥"[१०]

वेदान्तदर्शनानुसारं अखण्डसच्चिदानन्दः ब्रह्मैव नापरः । एकं ब्रह्म मायया अनेकानि रुपाणि धारयति । मायैव अविद्या-अज्ञान-अध्यास-अध्यारोप-विवर्त्तादिशब्दैः व्यवह्रियते । अनादि-अनिर्वचनीया माया एव निद्रा अस्ति । मायया शक्त्या स्वयं परमात्मा अपि सम्मोहितमेव प्रतीयते । तथा भ्रमकाले रज्जुः सर्पवत् प्रतीयते, परन्तु रज्जुतत्त्वज्ञानमनन्तरं सर्पस्य भ्रमज्ञानं बाधितं भवति । तथैव ब्रह्म अविद्यया मायया जीवजगतप्रपञ्चरूपम् आभासते । अनन्तरं निर्विकल्प-परोक्षतत्त्वज्ञानेन जीवजगतप्रपञ्चस्य बोधः भवति, अज्ञानस्य आवरणं छिन्नं जायते । तदा जीवः 'तत्त्वमसीति' गुरुपोदिष्टवाक्येन आत्मनः स्वरूपं परिचिनोति । ये सर्वात्मनि मां प्रपद्यन्ते केवलं ते एव ब्रह्मसाक्षात्कारं कुर्वन्ति । इदमेव आत्मस्वरूपस्य ज्ञानम् । यथोक्तं भगवता श्रीकृष्णेन श्रीमद्भगवद्गीतायाम्-

"देवी ह्वेषा गुणमयी मम माया दुरतया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥"११

श्रीपुरुषोत्तमचरितमिति महाकाव्ये दार्शनिक-कवि-वाचस्पति-महोदयः मायायाः स्वरूपं प्रकाशयति । ब्रह्म माया च उभौ यदा अविछिन्नं सञ्जायते तदा तत् सगुणभावं विभाति । सगुणवस्थायां तत् 'ईश्वरः' इति प्रोच्यते । सः सर्वेश्वरः सकलहृदयाभ्यन्तरे तिष्ठनपि स्वमायया सर्वान् परिचालयति । माया शुद्धसत्त्वप्रधानास्ति । इह जगति तां विचित्रमायां ज्ञातुं न क्षमते । बुधाः देवाश्च यस्याः मायायाः स्वरुपमपि न जानन्ति । तत्पदं स्वरुपं कथं हि कवेः विषयः भवेत् इति प्रतिपादयन् लिखति -

"नहि कोऽपि तवाद्भुतामिमां
क्षमते वित्तामिह स्वरुपः ।
विवुधा न विदन्ति यत् पदं
मम वाचो विषयः कथं हि तत् ॥"१२

अपि च-

"अजया णिजमायया विभो भ्रमयसैव चराचरं जगत्।
घतकृन्निजचक्रचङ्क्रमाज्जडमृतपिण्डमिवातिवेगतः ॥"१३

**आध्यात्मभावनायाः प्राधान्यम् :-**

आध्यात्मिक-आधिभौतिकतत्त्वस्य आत्मज्ञानसाधनं, आत्मसाक्षात्कारतत्त्वस्य विवेचनं भवति दर्शनम् । भारतीयदर्शनेषु अध्यात्मभावनायाः प्राधान्यं दृश्यते । कवि-गणेश्वर-महोदयस्य काव्यकृतयः धर्ममूलैव आसीत् । धर्मस्य विश्वजनीत्वं सार्वलौकिकत्वञ्च विश्वहितसम्पादनादेव प्रवर्त्तते । अपि च प्रजाणां संरक्षणम्, दानम्, यजनम्, अध्ययनम्, विषयेषु अनासक्तिः, शौर्यम्, धैर्यम्, युद्धेऽपलायनम्, दानञ्च क्षत्रियाणां कर्तव्यमवधार्यते । भगवान् श्रीकृष्णः गीतायां वदति -

"शौर्य तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥"१४

स्वधर्मपालनाय जनो मृत्युमपि आलिङ्गते, परं भयेन स्वधर्मात् पलायनं कृत्वा परधर्मं नैव अङ्गीक्रीयते । तदर्थमेव स्वधर्मात् पलायमानम् अर्जुनमुपदिशता भगवता श्रीकृष्णेन सम्यगुपदिष्टम् - 'स्वधर्मे निधनं श्रेयः परधर्मो भयाभयः ।' धर्मयुद्धं विना राज्ञः मङ्गलं न दृश्यते, न प्रतीयते इति वेदमतम् । युद्धक्षेत्रात् पलायनं न शोभनं इति कविनाऽपि पुरुषोत्तमचरिते काव्ये समुच्यते यथा -

"न धर्मयुद्धादपरं महीपतेः
प्रदृश्यते श्रेय इति श्रुतेर्वचः ।
जगाद गीतापि तथा तदाश्रवा
न शक्ति भाजमिदमस्तु शोभनम् ॥"१५

**कर्मानुवन्धित्वम् :-**

करणं कर्म कर्म । संसारोऽयं कर्मभूमिः । अत्र देवाः समये समये आगत्य कर्मरताः भवन्ति । कर्मरहिताः अत्र कीटपतङ्गादयोऽपि न भवन्ति । अतः समस्तजीवेषु श्रेष्ठाः मानवाः कर्मपरायणाः भवेयुः । जीवन-निर्वहणाय कर्मावश्यकम् । प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्त्तते । स्वार्थो परार्थो वा सर्वापि प्रवृत्तिः कर्माधीना । यतः कर्म एव जीवनमिति कथ्यते । कोऽपि मन्युष्यः निष्क्रियभूत्वा क्षणमपि न तिष्ठति । कर्मैव मानवजीवने साधकतमं, दुःखनिरोधकं, अर्थाधिगमसाधकं, पापनिवारकम्, आधिव्याधिविनाशकं चेति । यत्र यत्र कर्म, तत्र तत्र सुखम् । पुनश्च यत्र यत्र कर्माभावः तत्र तत्र दुःखावसादः । कर्मणः सुखाधिगमहेतुत्वात्, अकर्मणो दुःखमूलत्वात् । अतः मानवाः सदैव निष्कामभावनया एव कर्माणि कुर्युः । कदापि फलस्पृहा न कर्तव्या । यतो हि कर्मणि एव मानवस्य अधिकारोऽस्ति,न तु कर्मफलप्राप्तौ । अस्माकं फलप्राप्तिस्तु दैवाधीनं भवति । अतएव फलाशां परित्यज्य कर्माणि कर्तव्यानि । अस्मिन् प्रसङ्गे भगवता श्रीकृष्णेन निगदितं यत् -

"कर्मण्ये वधिकारस्ते मा फलेषु कदाचन ।
मा कर्मपलहेतुर्भूमा ते सङ्गोऽस्त्वकर्मणि ॥"१६

एवं च महाभारतस्य शान्तिपर्वणि उल्लिखितमस्ति यत् -

कर्मात्मात्वपरो योहसौ मोक्षवन्धैः स युज्यते ।
स सप्तदशकेनापि राशिना युज्यते पुनः ॥"१७

अर्थात् संसारेऽस्मिन् कर्माश्रयीजीवस्य हि वन्धनमोक्षौ स्तः । वस्तुतः यदि दार्शनिकदृष्ट्या सम्यक् रूपेण जगतः स्थित्योपरि विचारयामः, तर्हि इदं तथ्यं दृष्टिपथमायति यद् वास्तविकसुखस्य वसतिः जागतिकेषु पदार्थेषु न विद्यते, अपितु स्वान्तःकरणेन स्वकर्मफलानुसारमेव सुखं जायते । त्रिभूवने इदं सुखमलौकिकं लौकिकमिति विधात्रा द्विधा निश्चितम् । अनुमानमूलम् अलौकिकं स्वर्गसुखं चार्वाकादयः

न गणयन्ति । तस्मादिदं सुखं लौकिकमेव । यथोच्यते कविना-

"अलौकिकं लौकिकमित्योदो द्विधा
सुखं विधात्रा निहितं जगत्रये ।
अलौकिकं नो गणयन्ति केचना
नुमानमूलं तदिदं हि लौकिकम् ॥"[१८]

कलुषितात्मनां कुशलः चिकित्सकः, तृषार्त्तानां तृष्णानिवारणस्य परमो मन्त्रः, विषयासक्तात्मानां मुक्तिचिन्ताकारकञ्च भवति सुखम् । सर्वैः प्राणिभिः सततं सुखं प्राप्तुमेव नानाविधानि कर्माणि क्रियन्ते । इह जगति यत् वस्तु सुखं जनयति सौभाग्यवशतः तत् वस्तु दुःखं जनयति दौर्भाग्यात् । भोग्यं सुखदुःखमवश्यं भोगात् पूर्वं सुखीकरोति व्याकुलयति । यथा श्रीपुरुषोत्तमचरिते -

"सूते सुखं यदिह तद्विदधाति दुखं ।
भोग्यं पुरः सुखयति व्यथयत्यवश्यम् ॥"[१९]

अवश्यमेव भोक्तव्यं कृतं कर्म चरिते काव्ये-

"अनुष्ठितं कर्मफलत्यसङ्करं भुनक्ति कर्ता सदसत्फलं ततः।
सुखं सतो दुःखमवाधमन्यतत्ओस्तदेव दैवं परिकल्पितं वुधैः ॥"[२०]

कर्माधीनं जीवनम् । नरः पृथिव्यां सदा निजकर्मफलं भुङ्क्ते । इह फलभोगविषये कः वारकः निवारकः अस्ति न कोऽपीति । यथा वाचस्पतिना -

"निजकर्मफलं नरः सदा भुवि भूङ्क्ते क इहास्ति वारकः ।"[२१]

इह जगति कर्त्तव्यशीलराजानः स्वजीवनं सफलीकर्त्तुं समर्थाः भवन्ति । ते निस्वार्थभावनया मृत्युपर्यन्तं कार्यं कुर्वन्ति । अपि च ते राजानः कदा किञ्चिदपि प्रियाप्रियं हिताहितं अविचारितं कर्म सहसा सत्त्वरं न कुर्वन्ति । अविवेकिता निर्विचारता सर्वविनाशकारिणी सर्वस्वनाशिनी च । तदुक्तं कविना-

"न कर्म कुर्यात् सहसा कदाचना-
विवेकता सर्वविनाशकारिणी ।"[२२]

जन्मना जायते शूद्रः इति उक्त्यनुसारेण मानवः जन्मना शूद्रः भवति । अयं शूद्रशिशुः जातकर्मादि संस्कारेण ब्राह्मणः भवति । स्वकर्मणा विश्वामित्रः क्षत्रियोऽपि स्वकर्मवलेन ब्रह्मर्षिः अभवत् । पुरुषोत्तमः क्षत्रियोऽपि प्रभोः जगन्नाथस्य सेवकः सन् समार्जनात्मकं चाण्डालकर्म कृत्वा साम्प्रतं चाण्डालः वर्त्तते । तद्यथा -

"विप्रः शुद्रो भवति जनुषा ब्राह्मणः कर्मणासौ
विश्वामित्रोऽप्यभवदमुना कर्मणा विप्रवर्य्यः ।
क्षत्रत्वं चेद्भवति भवतः कर्मणाद्यं प्लवत्वम्
तस्मादेतां प्लववितरितां राजपुत्री गृहाण ॥"[२३]

**धर्मानुवन्धित्वम् :-**

अवश्यकरणीयं कार्यं, ईश्वरसत्तायां विश्वासञ्च कर्त्तव्याकर्त्तव्ययोः अवधारणरूपो धर्मः । धर्मेषु एव जगतः, विश्वस्य, राष्ट्रस्य, समाजस्य, परिवारस्य च स्थितिः प्रतिष्ठिता । धर्मः एव जीवनस्य सारः । धर्मो मानवस्य लोकपरित्रायकः, समुन्नतिसाधकश्च । पशवः आहार-निद्रा-भय-मैथुनादि कर्मसम्पादनेन स्वजीवनस्य साफल्यं कर्त्तुं चेष्टन्ते । परन्तु न महारनिद्राभयमैथुनं च सामान्यमेतत् पशुभिर्नराणाम् ।
धर्मो हि तेषामधिको विशेषो धर्मेण हीना पशुभिः समाना ॥"[२४]

जीवनस्य सर्वेषु कालेषु धर्मस्य प्रभावः साक्षात् विद्यते । कविना पुरुषोत्तमचरितेऽपि धर्मतत्त्वस्य वहुधा चिन्तनं कृतमस्ति । स हि कुलाचारः येन निजधर्मः परिपाल्यते । विपत्तौ अपि स्वधर्मं न त्यजति, धर्मं सततं रक्षति । अपि च धर्मपरः नरः त्रिभूवने सततं निखिलसम्मानस्य पात्रं भवितुमर्हति । धार्मिकः स्वतः सुखी सम्मानितश्च भवति इति कविना उक्तम् -

"स हि विधिनिजधर्म उदीर्यते
तमनुयाति सुखं वलपूर्वकम् ।
त्रीभूवनेऽखिलसमुत्कृतिभाजनं
भवति धर्मपरः सततं नरः ॥"[२५]

अधर्मो विनाशकारणम् । धर्ममार्गे वहुनि कष्टानि समायान्ति किन्तु तानि सर्वाणि अविचलितेन, धैर्येण च सह करणीयम् । इतिहासस्य पर्यालोचनेनापि ज्ञायते यत्-सर्वदा सर्वत्र

धर्मस्यैव विजयो बभूव । रामस्य, कृष्णस्य, पाण्डवानां, अन्येषां धर्मयुद्धरतानां विजयो वस्तुतः धर्मस्यैव विजयः । ये जनाः धर्मस्य पालनं न कुर्वन्ति ते अवश्यं विनाशं यान्ति । इ अपि च पुरुषोत्तमकाव्येपि कविना स्पष्टं प्रतिपादितं यत् -

"अवलम्ब्य इहस्ति केवलं निजधर्मः फलदानकोविदः।
परितोषकारो ममाण्यसौ त्यजतस्तं विजयोतिदुर्लभः ॥"[२७]

**पुरुषार्थत्वम् :-**

जीवनं पुरुषार्थसाधनमिति । धर्मार्थकाममोक्षभेदेन पुरुषार्थाः चतुर्धाः प्रतिपादिताः । धर्मार्थं कामार्थं अर्थोपार्जनार्थं मोक्षप्राप्त्यर्थं च सर्वत्रैव कर्मणः आवश्यकता दृश्यते । एषु पुरुषार्थचतुष्टयेषु धर्मस्य श्रेष्ठत्वं सर्वैः स्वीक्रियते । **"त्रयोधर्मस्कन्धा"**[२८] अर्थात् अध्ययनं, तपस्या, दान, धर्मपालनञ्च ब्रह्मचर्याश्रमे मुख्यतया विहितम् । गृहस्थाश्रमे अर्थकामयोः अर्जनं सेवनञ्च विहितम् । धर्मेण उपार्जितोऽर्थः मनुष्यं सर्वविधानन्देन संयोज्य परवर्त्ती जीवनमपि सुखमयं करोति । वेदान्तदर्शनानुसारं कथितमस्ति यत् –

"तद् यथेह कर्मजितो लोकः एवमेवामुत्रपुण्यजितो लोकः क्षीयते ।"[२९]

एतेषां धर्मार्थकामानां विशुद्धाचरणे वानप्रस्थाश्रमे मोक्षप्राप्तिः नाम चतुर्थः पुरुषार्थः सिद्ध्यति । अत्र जननमरणचक्ररूपात् संसारवन्धनात् मुक्तिः एव मोक्षः मन्यते । यथा मुण्डकोपनिषदि -

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥"[३०]

अपि च ब्रह्मोपनिषदि स्पष्टं प्रतिपादितमस्ति यत् यः हृदयाभ्यन्तरे स्थितः सन् अनाहतध्वनिं प्रकाशमय-चिदानन्दं परमतत्त्वं जानाति स्यैव जीवन्मुक्तः विद्यते । तद्धि -

"अनाहतध्वनियुक्तहंसं यो वेद हृदयगतम् ।
स्वप्रकाशचिदानन्दं स हंस इति गीयते ॥"[३१]

अतः राजा पुरुषोत्तमः दृश्यमानं जगत् मायामयमनित्यमिति विचिन्त्य पुत्रं प्रतापरुद्रदेवं स्वराज्यपरिपालनकर्मणि समर्पितवान् । ततः सः पद्मावत्या सह भगवन्तं हृदि ध्यायं शुद्धान्तःकरणः सन् वनमगच्छत् । तत्र वने निर्विकल्पे शुद्धसमाधौ योगारुढः भुत्वा निर्मलं सच्चिदानन्दं धामं प्राप्तवान् । यथोक्तं कविना-

"दत्वा राज्यरथगजमहाराजकोशादियुक्तं
रत्नागारं प्रकृतिनिवहं मन्त्रिसामन्तभृत्यान् ।
ध्यायं ध्यायं हृदिभगवतो रुपमाद्यन्तहीनं
मुदितमना पूजितो देववर्य्यैः ॥"[३२]

एकात्मभावनायाः प्राधान्यम् :-

"ईश्वरः सर्वभूतानां हृद्देशेहर्ज्जुनतिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्ररूढानि मायया ॥"[३३]

सर्व भूतेषु एकात्मभावना विश्वशान्त्याः मूलकारणम् । एषा च दिव्यभावना वर्त्तते । यत् - 'यस्मिन्नसर्वाणि भूतानि आत्मैवभूद्विजानताः । '[३४] अस्याः भावनायाः तथा आस्तिकदर्शनस्य आधारस्तम्भः भवति पुरुषोत्तमक्षेत्रं श्रीक्षेत्रम् । अस्मिन् पवित्रस्थाने सेवकाः प्रत्यहं भोगमण्डपे प्रभोः श्रीजगन्नाथस्य व्यञ्जनार्थं अन्नभोगमर्पयन्ति । तदनन्तरं प्रभोः उच्छिष्टमन्नप्रसादः महाप्रसादरूपेण परिणतो भवति । चाण्डालमुखात् पतितोऽपि सः महाप्रसादः कालत्रये द्विजाः ब्राह्मणाः सर्वे भक्त्या एकत्र भुञ्जन्ते । पुनश्च इह जगति पण्डिताः यं प्रासादं शुनः कुक्कुरस्य मुखात् पतितमपि पवित्रमनस्कान्तः सन् स्वीकुर्वन्ति । यथा-

"शुनो मुखात् भ्रष्टमपिह पूतं मनन्त्येव वुधाः प्रसादम् ॥"[३५]

**विश्वबन्धुत्वभावनायाः प्राधान्यम् :-**

व्यावहारिकं सार्वभौमिकं च स्वरुपमेव विश्वबन्धुत्त्वम् । समग्रविश्वेषु मानवेषु भातृत्वस्य दिव्यभावनायाः बन्धुभावः एव विश्वबन्धुत्वम् । सर्वे जनाः द्वेषभावनां विहाय परस्परं स्नेहेन, सौहाद्‌र्येन, भातृत्वेन च व्यवहरेयुः । ये विशालहृदयाः औदार्योपेताश्च मानवास्तेषां मते सर्व एव आत्मीयाः । एकाऽपि धरणी तेषां कुटुम्वः ।अतः उक्तम् -

"अयं निजपरोवेति गणना लघु चेतसाम् ।
उदारचरितानां तु वसुधैवकुटुम्बकम् ॥"

इयं विश्वमैत्रीभावना एव भारतीयदर्शनस्य मूलाधारः । सर्वे वर्णाः, सर्वे सम्प्रदायाः, सर्वाः जातयः च एकस्य । अतः सर्वे सर्वेषां प्रियं हितं चेच्छन्तु । एषा अमृतमयभव्यभावना वेदेषु प्राप्यते । यथा-

"समानी व आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ॥"[३६]

अस्याः भावनायाः सूचना कविना काव्येऽस्मिन् उपन्यस्ता । आषाढमासस्य शुक्लपक्षस्य द्वितीयायां तिथौ श्रीजगन्नाथस्य रथयात्रा महता समारोहेण अनुष्ठिता भवति । जाति-धर्म-वर्णनिर्विशेषेण सर्वेमानवाः सकलभेदभावं त्यक्त्वा वडदाण्डे प्रभोः दर्शनं निमित्तम् एकत्रिताः भवन्ति । सर्वेषां मनसि विश्वैकप्राणता-विश्वभातृत्वभावना-संहति-सद्भावना जागर्त्ति । अस्मिन् दिवसे स्वयं महाराजा उत्कलकेशरी पुरुषोत्तमः राजन्यकुलाभिमानं राजत्वाभिमानं च विहाय महाप्रभोः रथं प्रतिमागच्छति । सः तथाविधैः रथस्योपरि महाप्रभोः सेवाकार्ये सेवकरुपेण समार्जनीं करोति । अस्मिन् अवसरे सेव्यसेवकभावयोः दृष्टान्तः परिलक्ष्यते । काव्येऽस्मिन् यथा-

"तथाविधे कर्मणि योजितुं निजं
समाययावुत्कलकेशरी स्वयम् ।
विहाय राजन्यकुलाभिमानितां
प्रभोः पदाब्जैकनिविष्टमानसः॥"[३७]

**सेव्य-सेवक-भावप्राधान्यम् :-**

जगन्नाथदर्शनस्य आधारस्तम्भः सेवा । सेवाहि परमोधर्मः परमकर्त्तव्यश्च । जगदीश्वर-जगन्नाथस्य पादसेवकः दासः साधुभिः सततमाराध्यत एव । तस्मात् कारणात् इह जगति तत्त्वदर्शिभिः मुनिश्रेष्ठै इदं हि ईश्वरपादसेवनमेव प्रकाम्यते । यथा-

"जगदीश्वरपादसेवकः सततं सेव्यत एव साधुभिः ।
तदिदं हि सदा प्रकाम्यते मुनिवर्यैरिह तत्वदर्शिभिः ॥"[३८]

अपरपक्षे करुणापरायणः दयालुः जगदीशः प्रभुरपि निजसेवकस्य स्वदासस्य सर्वस्वसम्पादने च सततं यत्नवान् । अतएव विभोस्तत् सेवकस्य च कदापि भेदः अणुमात्रमपि न पश्यति । सेव्यसेवकयोरभेदः कविना काव्येऽस्मिन् इत्थं प्रतिपादितम् । यथा-

"निजसेवकसेवनद्यतो जगदीशः करुणापरायाणः ।
लवशोऽपि न भेद हरितो विभु तत्सेवकयोः कदाचन
॥"[३९]

**पुनर्जन्म-कर्मफलस्य अनिर्वार्यत्वम् :-**

भारतीय दर्शनेषु पुनर्जन्मसिद्धान्तः मन्यते । कर्मफलानुसारं मानवः पुनर्जन्म स्वीकुर्वति । यथा उच्यते गीतायाम् -

"जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्ये अर्थे न त्वं शोचितुमर्हसि ॥"[४०]

अर्थात् मृत्युना शरीरं नाशं भवति, परन्तु आत्मनः विनाशः कदापि न भवति । यथा जीर्णवस्त्राणि विहाय नवीनानि मानवाः धारयन्ति तथैव एकं शरीरं विहाय अन्यमेकं शरीरं धारयति स आत्मा । तद्यथा -

"वासांसि जीर्णानि यथा विहाय, नवनि गृह्णानि नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥"[४१]

अर्थात् लब्धजन्मनः मृत्युः ध्रुवम् । मृतस्य च जन्म अपि ध्रुवम् । तस्मात् अपरिहार्ये अर्थे न तु शोचितुमर्हति इति । कृतं क्रियमाणकर्म फलभाग् भवति । अवश्यं तत् समस्तं कर्मफलं भोक्तव्यमिति आस्तिकदर्शनानां मतम् । सर्वे प्राणीनः स्वकृतस्य शुभाशुभफलं कर्मानुसारमेव प्राप्नुवन्ति । कविः गणेश्वरमहोदयः अस्मिन् विषये पुरुषोत्तमचरिते प्रतिपादयति यत् -

"अपाठयेत्तेन समं परान् सुतान्
स्तथापि सर्वाधिकतामसौ गतः ।
ततः कनिष्ठोऽपि गुरुत्वमागतो
गुणाश्च पूर्वार्जितकर्मसम्भवाः ॥"[४२]

राजा कपिलेन्द्रदेवः तस्य अन्येषां सूतानामपेक्षया पुरुषोत्तमदेवे अधिकं स्निह्यति । गुणेन आधिक्यमागतः असौ कनिष्ठोऽपि अन्येभ्यः पुत्रेभ्यः गुरुत्वं प्रदाय तं युवराजपदे अभिषिक्तवान् । सर्वमेतत् सम्भवं प्राक्तनकर्मफलहेतुरुपा इति कविना स्पष्टीक्रियते ।

**जीवनपोयोगितातत्वम् :-**

सत्यं वद, धर्मं चर, सत्यात् न प्रमदितव्यम्,
धर्मान्नप्रमदितव्यम् ॥"[४३]

एवं भारतीयधर्मशास्त्राणि मानवस्य कर्त्तव्याकर्त्तव्यानां विशद्विवेचनं कुर्वन्ति । इदमेकप्रकारकं विज्ञानं यत्र समाजस्य विचारणीयविधीनामध्ययनं क्रियते । मानवः किं कुर्यात् किं न कुर्यात् इत्यादीनां विश्लेषणमपि सम्पाद्यते । अत्र व्यक्तित्वस्य, बोधस्य, साधारणबिधेः, चिन्तायाः विषये च संकल्पाः सन्ति । अस्य मानव-वादस्य प्रकृष्टमुदाहरणं कविना कव्येऽस्मिन् समुपस्थापितम् । अस्मिन् समाजे मानवः आचारव्यवहारस्य अध्ययन-अध्यापने चाधिकं गुरुत्वं ददाति । अस्मिन् जगति न कोऽपि एकाकी संसरति अपितु वन्धुभिः सह मिलित्वा सुखदुःख-हानिलाभादि-विषये चिन्तयति । अतः वन्धुषु वन्धुजनेषु च मानविनाशकः, सम्मानविध्वंशकः, कलहश्च कदापि नहि शोभते । कविना अस्मिन् प्रसङ्गे सूच्यते -

"नहि वन्धुजनेषु शोभते कलहो मानविनाशकः कदा
विषन्तौसमा हि वन्धुता परिमाणोऽपि हि पातनासहा ॥"४४

नारी गृहे निवसन्ती सती अपि अनेक रूपाणि धारयति । कदाचित् सा भार्या रूपेण पत्युः सेवां करोति, कदाचित् मातृरूपेण शिशुं लालयति, कदाचित् दासीरूपेण गृहकार्याणि सम्पादयति । अतः अनेकासां कल्याणानां भाजनानि स्त्रियः खलु पूजार्हाः भवन्ति । पिता, पतिः, पुत्रः इमे सर्वे स्त्रीणां मानं रक्षन्ति । शास्त्रेष्वपि वर्ण्यते - "पिता रक्षति कौमारे, भर्त्ता रक्षति यौवने, पुत्रः रक्षति वार्द्धक्ये न स्त्री स्वातन्त्र्यमर्हतीति" । एवं स्त्रीणां सुरक्षा सर्वादौ करणीया ।
वस्तुतः समाजस्य उन्नतिः नारीणां समादरे, तासां पूजया एव निहिता वर्त्तते । उक्तं च मनुना-

"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।"४५

अपि च पुरुषोत्तमचरिते काव्ये -

"पिता पतिः पुत्र इमे यथाक्रमं
भवन्ति मान्याः स्त्रीयः इत्युदाहृतम् ॥"४६

पुरूषोत्तमचरिते महाकाव्ये वर्णितं राजनैतिकं जीवनम् आचारशास्त्रानुगतम् । तेन विधानानुसारेण न्यायव्यवस्थासञ्चालनाय राज्ये साम-दान-दण्डनीतेः च सन्निवेशो विद्यते । राज्ञः कर्म शत्रुविनाशनं राष्ट्रसंरक्षणं च आसीत् । राजा सार्वलौकित्वं सार्वभौमिकत्वञ्च विश्वहितसम्पादनादेव प्रवर्त्तते । तस्य गन्तव्यमार्गे वहुविधाः वाधाः आगच्छन्ति । जय-पराजयस्य सूचनाऽपि भवेत् । तथापि राजा भीतिं नहि कुर्यात् । सर्वथा राजा स्वधर्मस्य पालनं रक्षणं च करणीयम् । यथा पुरुषोत्तमचरिते -

"सर भूमिपते स्वकर्मकृत्पथि ते स्याद् विजयस्य सूचना ।
नहि भितिलवोऽपि जायतां निजधर्मं परिरक्ष सर्वथा ॥"४७

**षडरिपुदमनम् -**

भक्ताः योगिनः च शरीरमिदं रथवत् कल्प्यन्ति । रथः यथा त्रितलविशिष्टः तथैव मानवशरीरं सहस्रार-हृदय-मूलाधारचक्ररूपं त्रितलविशिष्टम् । उद्ध्र्वतमचक्रे सहस्रदलकमले श्रीवामनदेवः विराजितः । सः जगन्नाथः वामनावतारे त्रिभूवनमधिकृतवान् । यः साधकः स्वसाधनावलेन विश्वप्रसिद्धरथयात्रायां रथोपरि सहस्रदलकमले स्थितं वामनरूपमेकवारं पश्यति, सः पुनर्जन्म न लभते । मध्यतलं भवति हृदयचक्रं यत्र समस्त देवीदेवाः लीलां कुर्वन्ति । निम्नभागे अर्थात् मूलाधारचक्रे कामादिरिपुगणाः अवस्थानं कुर्वन्ति । करुणामयः वामनदेवः यदा रथे विराजितो भवति, तदाभक्तानां शङ्ख-तालादिवाद्यैः षड्-रिपवः पलायन्ते । यथा-

"उपागते पावनगुण्डिचोत्सवे
समययुर्दुरतरादपि प्रजा ।
रथे सकृद्वीक्ष्य विभोः पदाम्बुजं
चिरं तदीयं पदमाप्नुमोजसा ॥"४८

एवं प्रकारेण कवेः काव्येषु प्रतिपादितानि कानिचन-दार्शनिकतत्त्वानि यथा परमात्मनः स्वरूपम्, मायायाः स्वरूपम्, धर्मानुवन्धित्वम्, कर्मानुवन्धित्वम्, पुरुषार्थत्वम्, एकात्मभावनायाः प्राधान्यम्, विश्ववन्धुत्वभावनायाः प्राधान्यम्, पुनर्जन्म-कर्मफलस्य अनिर्वाच्यत्वम् सेव्य-सेवकभावप्राधान्यम्, जीवनपोयोगितातत्त्वादि अस्मिन् प्रवन्धे आलोचितानि वर्त्तन्ते । सर्वोपरि भारतीय-दर्शनस्य प्रमुखलक्ष्यं भवति मानवस्य चिरन्तन-शाश्वत-सुखसम्पादनम् । व्यक्तिगततया तथा सामुहिकतया अस्य मानवजीवनदर्शनस्य पथं प्रदर्शयति कवि-गणेश्वर-रथ-महोदयस्य काव्यानि । तत्र शास्त्र-नैपुण्य-समेतं दार्शनिक-भावक च सहृदय-जनानां श्रद्धाभाजनम् । संस्कृतसाहित्यं प्रति कवेः सारस्वतमवदानम् अविस्मरणीयमेव । श्रीजगन्नाथस्य धर्म-दर्शन-संस्कृतेः आधारस्तम्भः उत्कलप्रदेशः । उत्कलीयानां प्रगति-विश्वास-भक्ति-साधनायाः अनुप्रेरकः भवति इयं जगन्नाथचेतना । परिशेषे

समग्रविश्वे साम्य-मैत्री-एकता-शान्तेः वार्ता प्रसारं कृत्वा श्रीजगन्नाथदर्शनं उज्जीवितं करोतु इति मम निवेदनम्।

**संन्दर्भाः**


१. महाभारतम्,आदिपर्वणि,६२/५३
२. गीता-१५/१८
३. कठोपनिषद् -१/३/१५
४. केनोपनिषद् -१/५
५. मुण्डकोपनिषद् - १/१/६
६. पुरुषोत्तमचरितम्-५/२७
७. पुरुषोत्तमचरितम्- ५/२८
८. पुरुषोत्तमचरितम्-७/३०
९. पुरुषोत्तमचरितम्-५/३४
१०. गौडपादः, मात्रुक्यकारिका-१/१६
११. श्रीमद्भगवद्गीता- ७/१४
१२. पुरुषोत्तमचरितम्-७/२६
१३. श्रीपुरुषोत्तमचरितम्-७/२५
१४. श्रीमद्भगवद्गीता-१८/४३
१५. श्रीपुरुषोत्तमचरितम् -९/६३
१६. श्रीमद्भगवद्गीता -२/४७
१७. महाभारत-शान्तिपर्व - १४/१५
१७. श्रीपुरुषोत्तमचरितम् -६/५५
१८. श्रीपुरुषोत्तमचरितम्-९/७६
१९. श्रीपुरुषोत्तमचरितम्- १/४०
२०. श्रीपुरुषोत्तमचरितम्-७/४६
२१. श्रीपुरुषोत्तमचरितम्-६/५९
२२. श्रीपुरुषोत्तमचरितम् -१२/६९
२३. हितोपदेशः-१/२५
२४. श्रीपुरुषोत्तमचरितम् -४/२९
२५. मनुस्मृतिः-४/१७४
२६. श्रीपुरुषोत्तमचरितम्-७/४८
२७. छान्दोग्योपनिषद् -२/२३/१
२८. छान्दोग्योपनिषद् -८/१/६
२९. मुण्डकोपनिषद् - २/२/८
३०. ब्रह्मोपनिषदि-२०/२१
३१. पुरुषोत्तमचरितम्-१२/८६-८७
३२. श्रीमद्भगवद्गीता -१८/६१
३३. यजुर्वेदः -४०/७
३४. श्रीपुरुषोत्तमचरितम्-५/३८
३५. ऋग्वेदः -१/१९१/४
३६. श्रीपुरुषोत्तमचरितम्-६/३१
३७. श्रीपुरुषोत्तमचरितम्-७/६७
३८. श्रीपुरुषोत्तमचरितम्-७/६८
३९. श्रीमद्भगवद्गीता - २/२७
४०. श्रीमद्भगवद्गीता -२/२२
४१. श्रीपुरुषोत्तमचरितम्-१/५८
४२. तैत्तिरियोपनिषद् -१/११/१
४३. श्रीपुरुषोत्तमचरितम्-७/७२
४४. मनुस्मृतिः- ३/५६
४५. श्रीपुरुषोत्तमचरितम्-९/७२
४६. श्रीपुरुषोत्तमचरितम्७/५०
४७. श्रीपुरुषोत्तमचरितम् -६/१९


**सहायक-ग्रन्थादीनां सूची**


1. श्रीपुरुषोत्तम-चरितम्(गणेश्वर-रथ-वाचस्पतिः)
2. ओडिशा साहित्य अकादेमी,भूवनेश्वर,ओडिशा,१९७०
3. मिश्रः, जगदीशचन्द्रः, भारतीय-दर्शनम्, चौखम्बाप्रतिष्ठानम्, दिल्ली,२०१४
4. आचार्यः, माधवः (संपा), सर्वदर्शन-संग्रहः उमाशङ्कर शर्मा, चौखम्वा विद्या भवन,वाराणासी.१९६४
5. आचार्यः, सदानन्दः, वेदान्तसारः, संस्कृतपुस्तकालयः, जयपुरम्,२००५
6. उपाध्यायः, बलदेवः, भारतीयदर्शनम्, शरदा मन्दिर, वाराणसी, १९७१
7. त्रिवेदी, रामगोविन्दः(संपा), ऋग्वेदसंहिता (सायणभाष्यः),
8. चौखम्बा विद्याभवन, वाराणसी, १९९७
9. ईशादि-दशोपनिषदः, मोतिलाल बनारसीदास, दिल्ली, १९७८
10. ऋग्वेदसंहिता, नाग पब्लिशर्स, दिल्ली, २००२
11. वृहदारण्यक-उपनिषद्, अद्वैतआश्रम-कोलकत्ता, १९७५
12. श्रीदुर्गाशप्तशती,गीताप्रेस्, गोरखपुर
13. श्रीमद्भगवद् गीता,गीताप्रेस, गोरखपुरम्,२००९